# संस्कृतवार्ताः

**दिनाङ्क :- 10.06.2025** **प्रातः - 06:55**

**प्रधानमन्त्री-एकादश-वर्ष**

प्रधानमन्त्रिणा नरेन्द्रमोदिना दृढरूपेण प्रतिपादितं यत्, देशे विगत-एकादशवर्षेषु विविधक्षेत्रेषु द्रुतगत्या परिवर्तनम् अभवदिति। एतच्च एकशतचतुर्विंशति-कोटि-भारतीयानां सामूहिकसहभागित्वेन प्रेरितम् अस्ति। यदा केन्द्रस्य एन्. डी. ए. सर्वकारस्य कार्यकालस्य एकादश-वर्षाणि पूरितानि, तदा 'सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास' इति मार्गदर्शकसिद्धान्तानुसारं केन्द्रप्रशासनम् द्रुतगत्या, अधिकपरिमाणेन, संवेदनशीलतया च पथप्रदर्शकानि परिष्काराणि अकरोदिति।

**निर्मला-जी. सी. उपवेशनम्:**

केन्द्रीय-वित्तमन्त्री निर्मला सीतारामनः अद्य नवदेहली-नगरे राष्ट्रिय-निवेश-आधारभूत-संरचना-कोष-सीमिताख्यस्य परिषदः गवर्निङ्ग्-कौन्सिल्- इत्यस्य षष्ठ्याः सभायाः अध्यक्षतां कृतवती। सभायां वित्तमन्त्रिणा सह अन्ये च सदस्याः अपि प्रमुख-मार्गदर्शनेति विषये चर्चां कृतवन्तः।

**गृहमन्त्री अमितशाहः**

गृहमन्त्री अमितशाहः अकथयत् यत् न्यूनतमप्रशासनस्य अधिकतमशासनमिति समीकरणेन देशे विकासस्य गतिः, परिमाणं च परिवर्तितम्। आपरेशन् सिन्दूर् इत्यस्यानन्तरं जम्मू-कश्मीर्-प्रदेशस्य सीमाक्षेत्रेषु पाकिस्तानी-गोलिकादिप्रहारैः क्षतिग्रस्तानां द्विसहस्रषड्गृहाणां पुनारचनायै पञ्चविंशति कोटिरूप्यकाणां अतिरिक्तव्यवस्थां सर्वकारः कल्पयिष्यति।

**भारतीय-रेल्**

भारतीय-रेल्-संस्थया मुम्बै-नगरस्य उपनगरीय-रेल्-जालस्य सर्वेषु नूतनेषु कोच्-विशेषेषु स्वचालित-द्वारपिधान-व्यवस्था स्थापिता भविष्यति।

**तेलङ्गाना-चौहानः-**

केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत् कृषिक्षेत्रस्य विकासं विना देशः विकसितराष्ट्रं न भविष्यति। तेलङ्गाना-राज्यस्य रङ्गा-रेड्डी-मण्डले आयोजिते विकसित-कृषि-संकल्प-अभियान-कार्यक्रमे भाषमाणः श्रीचौहानः खाद्यसुरक्षां साधयितुं, कृषकाणां आयं वर्धयितुं, तैलस्य रक्षणाय च बलम् अददात्।

**सेन्सेक्स सूचकाङ्कः**

सेन्सेक्सेति सूचकाङ्कः क्रमानुसारेण चतुर्थं सत्रं यावत् अन्ववर्तत, चतुश्शतमुत्तराष्टाविंशत्सहस्रादुपरि च समाप्तः।

**भारतीय-ऋतुविज्ञान**

आगामि-दिनद्वये पञ्जाब्, हरियाणा, चण्डीगढ, दिल्ली, उत्तरप्रदेशे, राजस्थानस्य पूर्वभागेषु च उष्णतरङ्गस्य स्थितिं प्रति भारतीय-ऋतुविज्ञान-विभागेन नारङ्गवर्णीयसूचना दत्ता अस्ति।

**धोनी हाल् आफ् फेमः**

सुप्रसिद्धः भारतीयः क्रिकेट् क्रीडकः पूर्वदलनायकश्च एम्. एस्. धोनी इत्येषः प्रतिष्ठितायां आई. सि. सि. हाल्-आफ़्-फ़ेम- इत्यस्मिन् सम्माने समावेशितोऽस्ति, अवसरोऽयं तस्य क्रिकेट्-क्रीडाजीवनस्य अन्यः गौरवपूर्णः अध्यायः अस्ति। अन्ताराष्ट्रिय-क्रिकेट्-परिषद् अघोषयत् यत् अस्मिन् वर्षे सम्मानितेषु सप्तानां क्रिकेट्-क्रीडकानां मध्ये धोनी अपि अस्तीति, यस्मिन् मैथ्यू हेडेन्, हाशिम् आम्ला इत्यादयः महान् क्रीडकाः सन्ति।

**फ़ुट्बाल्-इन्ड् Vs होङ्ग् कोङ्ग्**

पादकन्दुक-क्रीडायां भारतस्य वरिष्ठ-पुरुष-दलम् अद्य हाङ्ग्-काङ्ग्-नगरस्य कै-टाक्-क्रीडाङ्गणे सप्तविंशत्युत्तरद्विसहस्रतमे जायमानायां ए. एफ्. सि. एशियन्-कप् क्वालीफ़ैयर् इत्यस्य अन्तिमचक्रीय-स्पर्धायां हाङ्ग्-काङ्ग्-देशेन सह सप्ताङ्कैः स्पर्धते। क्रीडायाः आरम्भः भारतीयसमयानुगुणं सायं सार्धपञ्चवादने भविष्यति।

**॥ इति वार्ताः॥**